|| श्री हरि ||



अवधविहारी संस्कृत महाविद्यालयः, रहीमपुर, खगड़िया
अङ्गीभूत
कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः, दरभंगा।

" लघुसिद्धान्तकौमुदी "
[ संज्ञाप्रकरणम् ] शास्त्री प्रतिष्ठा,
विषयः साहित्यम्,
प्रथमखण्ड, अनिवार्य प्रथम
प्रश्नपत्रम्, अनिवार्य व्याकरण

उच्चैरुदात्तः - १।२।२९॥
ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् ॥

व्याख्या -
प्रस्तुतसूत्रमिदं पाणिनिविरचित 'अष्टाध्यायी' इति ग्रन्थस्य प्रथमाध्यायस्य द्वितीयपादान्तर्गतं स्थानविशात् सूत्राद् उद्धरितमस्ति।
अत्र शब्दधर्मविशेष उच्चैस्त्वं नैव विवक्षितं किन्तु उच्चैशब्दः अधिकरणशक्तिप्रधान ऊर्ध्वभागे इत्यर्थे वर्तते। ऊर्ध्वत्वस्य चावयवापेक्षायां तालुकण्ठादिवर्णाभिव्यक्तिस्थानानामित्यर्थो लभ्यते। ऊकालोऽजिति सूत्रादजित्यनुवर्तते, तदेतदाह - ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्। ताल्वादीनां सावयवत्वकथनम् 'ऊर्ध्वभागे' इत्यस्य उपपादनार्थम्, तेषाम् अखण्डत्वे ऊर्ध्वभागे इत्यनुपपत्तेः॥

भावार्थः —
उच्चैरुदात्तः - १।२।२९॥
भागयुक्त तालु - कण्ठ आदि स्थानों

Scanned with CamScanner

के ऊर्ध्वभाग (ऊपर के हिस्से) से निष्पन्न – अर्थात् – उच्चारण किया जानेवाला अच् 'उदात्तसंज्ञक' (नामक) होता है। यह सूत्रार्थ है।

प्रस्तुत सूत्र महर्षि पाणिनिप्रणीत अष्टाध्यायी ग्रन्थ के प्रथमाध्यायस्थ द्वितीयपादान्तर्गत उनतीसवाँ क्रम से उद्धरित किया गया है।

यहाँ 'उच्चैः' शब्द पद शब्दधर्मविशेष में निरूढ़ नहीं है किन्तु अधिकरणशक्तिप्रधान 'ऊर्ध्वभाग' इस अर्थ में है। 'ऊर्ध्वत्व' का आश्रयी की अपेक्षा होने पर तालुकण्ठादिवर्णाभिव्यक्तिस्थानों का ग्रहण होता है। 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इस सूत्र से अच् की अनुवृत्ति है।

'भागसहित तालुकण्ठादि' ऐसा करना 'ऊर्ध्वे भागे – ऊपर के भाग' इस अर्थ की उपपत्ति के लिए किया गया है।

नीचैरनुदात्तः – १।२।३०॥

ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्।

सूत्रोऽयं सूत्रमिदं पाणिनेरष्टाध्यायी ग्रन्थस्य प्रथमाध्यायस्थ द्वितीयपादान्तर्गतं त्रिंशत् क्रमादुद्धरितमस्ति। अस्य स्पष्टोऽर्थः।

भावार्थः –

भागसहित तालु कण्ठ आदि स्थानों के अधोभाग – नीचे के हिस्से से निष्पन्न – उच्चारण किया जानेवाला अच् 'अनुदात्तसंज्ञक' होता है।

Scanned with CamScanner

समाहारः स्वरितः - १।२।३१।।

उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्। स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा।

प्रस्तुतसूत्रमिदं पाणिनेरष्टाध्यायीग्रन्थस्य प्रथमाध्यायस्य द्वितीयपादान्तर्गतमेकत्रिंशत् क्रमादुद्धिरितमस्ति। अत्र समाहारः' प्रथमान्तपदं 'स्वरितः' इति प्रथमान्तपदं, (द्विती) द्विपदात्मकमिदं सूत्रम्। पूर्वोक्ताभ्यां सूत्राभ्यां उदात्तानुदात्तौ अनुवर्तेते, उपदेशेऽजनुनासिकइत् इत्यतः अजिति अनुवर्तते।

उदात्तवर्णधर्मः अनुदात्तवर्णधर्मश्च समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञको भवति। सोऽच् ह्रस्वोदात्त, ह्रस्वानुदात्त, ह्रस्वस्वरित - दीर्घोदात्त, दीर्घानुदात्त - दीर्घस्वरित एवं प्लुतोदात्त - प्लुतानुदात्त - प्लुतस्वरितभेदेन नवविधोऽपि अनुनासिकानुनासिक भेदेन द्विधा भवतः। द्वाभ्यां प्रकाराभ्यां वर्तते इत्यर्थः। तदेवमनुनासिका नव अचः, अननुनासिकाश्च नवेत्याष्टादशविधत्वमेकैकस्याच् इति स्थितम्।

मुखनासिकावचनोऽनुनासिकः -१।१।८॥

प्रस्तुतमिदं सूत्रं पाणिनि अष्टाध्यायीग्रन्थस्य प्रथमाध्यायस्य प्रथमपादान्तर्गतं अष्टमसूत्रादुद्धरितमस्ति।

~~(भट्टोजि)~~ वरदराजाचार्यः स्ववृत्तौ लिखति- मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्, एचामपि द्वादश तेषां ह्रस्वाभावात्।

अत्र मुखेन सहिता मुखसहिता, मुखसहिता चासौ नासिका चेति मुखनासिका, शाकपार्थिवादित्वात् सहितपदस्य लोप, उच्यते- उच्चार्यतेऽसौ वचनः, मुखनासिकया उच्यते वचनः मुखनासिकावचनः। एवं मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिक संज्ञको भवति इति फलितार्थः।

तदित्थम् - अ, इ, उ, ऋ वर्णानां प्रत्येकमष्टादश भेदाः स्वीकृताः। लृवर्णं द्वादश - तस्य दीर्घाभावात् - तथा च उदात्तलृकारदीर्घः अनुदात्तलृकारदीर्घः स्वरितलृकारदीर्घः, ते च अनुनासिकास्त्रयः, अननुनासिकास्त्रयः - इति षड्भेदानामभावे सति ह्रस्वप्लुतप्रपञ्चश्च षड्विध इति लृकारस्य द्वादशविधत्वमेवेति भावः।

एचामपि द्वादश तेषां ह्रस्वाभावात् - एवञ्च ह्रस्वप्रपञ्चषड्भेदाभावाद् द्वादशविधत्वमेवैचामिति भावः।

डॉ॰ अवधेशकुमारशर्मा
सहायकप्राचार्यः, व्याकरणम्,
अवधविहारीसंस्कृतमहाविद्यालयः
रहीमपुरः, खगड़िया।

Scanned with CamScanner